# परिचायकम्

के. जि. पौलोस्

विश्वसंस्कृतेः पोषणार्थं भारतीयानां महती संभावना खल्वमरवाणी। अस्यामेव निर्गलिता वाल्मीकिव्यासभासकालिदासादीनामनर्गला भावकल्लोलिनी। उदग्ररमणीयां पृथिवीं सासूयमालोक्य विहाय देवान् भुवमवतरन्त्याः स्वर्लोकवासिन्याः कथा अस्यामेव भाषायामङ्किताभूत् कविकुलगुरूणा। इतिहासपुराणादीनि वाङ्मयानीव कूटियाट्टादीनि रूपकाणीव च आधुनिकी अभ्रपालिरपि आर्यभाषाया वशंवदेति स्पष्टमावेदयति प्रियमानसाभिधाना नूतनेयं चलच्चित्राविष्कृतिः। विनोद् मङ्करेति प्रथितस्य प्रस्तुतिर्भवति केन्द्रसर्वकारेण पुरस्कृतेयं सिनिमा। केरलीयशाकुन्तलमिति स्तूयमानं नलचरितमधिकृत्य कृतभिदं चलच्चित्रम्। कथकल्यां नास्ति नलचरितस्य सदृशं किञ्चित्। अत एव कैरल्याः भावपरिसरः सुगन्धश्च चित्रेऽस्मिन् सर्वत्रानुभूयते।

'नलचरितं पञ्चमो दिवसः' इति नाम्ना ह्रस्वचित्रमेकं हृद्यं कृतभासीत् पूर्वमनेन संविधायकेन। केरलकलामण्डलस्य पुरस्कारोपि तस्य लब्धम्। नलचरितस्य कर्ता उण्णायिवारर्, नायको नलः, तद्रूपधारी नट इत्येतेषां त्रयाणां मानासिकसंघर्षाणि विदग्धतया तास्मिन् आविष्कृतान्यासीत्। महानटः कलामण्डलं गोपिः कर्तुः नायकस्य नटस्य च त्रिधा विभक्तं भावतलं अतीव चारुतरेण रूपेण आविष्चकार।

इदमेव बीजं प्रियमानसस्य। सम्पूर्णरूपेण प्राप्ते विकासे, मेधालोके मयूराणीव, सा कथा मनोहरा सञ्जाता। अस्त्यत्रातिसूक्ष्मा प्रणयकथा निलीना काचित्। कविः स्वग्रामे बाल्यं निनाय किल। तदानीं समीपस्थायां शालीनायां कन्यकायां अनुरक्तो बभूव। भाग्यविपर्ययात् अनुरागलता न कुसुमिता। भग्नमनोरथः स कामी देशान्तरमगमत्। अन्ते राजधानीं प्राप। तत्र राजा नलकथां अभिनेयार्थं रचयितुं कविमादिदेश। नष्टप्रणयिनीं दमयन्तिमिति  आत्मानं नलमिति च मत्वा नलचरितं स प्रणिनाय। अत्यन्तगूढेयमन्तर्वाहिनी व्यथा लावण्यधारेव सर्वेषां हृदयमावर्जयति।

सर्वमपि सुरभिलं भवत्यास्मिन् चलच्चित्रकाव्ये। प्रियमानसमित्यभिधैव भावाननेकानुन्मीलयति। हंसं प्रति नलस्य व्यङ्ग्यमधुरा सम्बोधनेयम्। ललिता मनोहरा च शैली। अनभ्यस्तानामपि सुगमार्थवोधकं

भवति संस्कृतवाङ्मयम्। केरलदेशस्य प्रकृतिरमणीयता, केदाराणां हरितकान्तिः, आकर्षकाणि रम्यहर्म्याणि, आहार्यचारूता सर्वेप्यस्य दृश्यचारूतां संवर्धयन्ति। अभिनयस्य भावसान्द्रता, गीतकानामार्द्रता, छायाग्रहणस्य सूक्ष्मता च सविशेषतः प्रशंसनीयाः।

सहृदायानां सर्वेषां, विशिष्य संस्कृतप्रणयिनां लोचनासेचनकामृतकल्पं प्रतिभति प्रियमानसम्।

लब्धप्रतिष्ठः कृतहस्तश्च विनोद् मङ्करा। तस्य प्रतिभायाः सोपानपरम्पराया आरोहणे प्रथमपादप्रक्षेपणी भवत्वियं पुरस्कृतिरिति सस्नेहमाशास्महे।।

**के. जि. पौलोस्**

१३.०३.२०१८ भूतपूर्वकुलपतिः, कलामण्डलं कल्पितसर्वकलाशाला